# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रिद्वितीयवर्षम् (SEM-4) **प्रश्नपत्रम् –** ०५ **गुणाः -** ७०

**विषयः -** साहित्यम् **कोड – C.C. 2.4.7. (NEW)** **समयः -** ०३ तः ०६

**दिनाङ्कः -** ०३/०४/२०१९ **सन्दर्भग्रन्थः –** दशरूपकम् (३-४ प्रकाशौ)

---

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ यथेच्छं द्वयो: कारिकयो: ससन्दर्भव्याख्यां कुरुत ।** १०

१.भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रय: ।
भेदै प्ररोचनायुक्तैर्वीथीप्रहसनामुखै: ॥

२. नायिका तु द्विधा नेतु: कुलस्त्री गणिका तथा ।
क्वचिदेकस्य कुलजा वेश्या क्वापि द्वयं क्वचित् ॥

३. भाणस्तु धूर्तचरितं स्वानुभूतं परेण च ।
यत्रोपवर्णयेदेको निपुण: पण्डितो विट: ॥

प्रश्नः – २ प्रकरणस्य स्वरूपं दशरूपकानुसारेण सविस्तरं प्रतिपादयत । १०

(अथवा)

भाण: यथाधीतं ग्रन्थोक्तदिशा चर्च्यताम् ।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ प्रदत्तेषु द्वयो: कारिकयो: ससन्दर्भव्याख्या कार्या ।** १०

(१) डिमे वस्तु प्रसिद्धं स्याद् वृत्तय: कैशिकीं विना ।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगा: ॥

(२)विभावैनानुभावैश्च सात्त्विकैर्व्यभिचारिभि: ।
आनीयमाना: स्वाद्यत्वं स्थायीभावो रस:स्मृत: ॥

(३) मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते ।
हर्षोत्कर्षो मद: पानात्स्खलदङ्गवचोगति: ॥

**प्रश्नः – ४ कस्याप्येकस्य सविस्तरम् उत्तरं यच्छत ।** १०

१. वीथीसमवकारयो: प्रतिपादनं कुरुत ।

**(अथवा)**

२. रससूत्रं विलिख्य रसस्वरूपं प्रतिपादयत ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः –५ प्रदत्तेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१) रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥

२) श्रृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् ।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ॥

३) कोपचेष्टाश्च नारीणां प्रागेव प्रतिपादिताः ।
कार्यतः सम्भ्रमाच्छापात्प्रवासो भिन्नदेशता ॥

**प्रश्नः –६ प्रदत्तयोः प्रश्नयोः एकस्य सविस्तरम् उत्तरं दत्त ।** **१०**

**१. ग्रन्थोक्तदिशा स्थायिभावानां विवेचनं कुरुत ।**

**(अथवा)**

**दशरूपकानुसारेण शान्तरसस्य रसत्वं प्रतिपादयत ।**

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत ।** **१०**

१) धनञ्जयस्य पितुर्नाम किमस्ति ?

२) रूपकाणि कति सन्ति ?

३) वृत्तयः कति सन्ति ?

४) भारतीवृत्तेः कति भेदाः सन्ति ?

५) भारतीवृत्तेः लक्षणं किम् ?

६) वीथ्यङ्गानि कति भवन्ति ?

७) भाणस्य लास्याङ्गानि कति सन्ति ?

८) कस्मिन् रूपके वृत्तं कल्पितं वा लोकसंश्रयात्मकं भवति ?

९) प्रहसने प्रधानरसः कः ?

१०) व्यायोगे कति अङ्काः भवन्ति ?

११)धूर्तस्य चरित्रचित्रणं कस्मिन् रूपके भवति ?

१२) विभावः कतिविधः ?

१३) धनञ्जयस्याभिमतमनुभावस्य स्वरूपं किम् ?

१४) व्यभिचारिभावाः कति सन्ति ?

१५) श्रृङ्गाररसस्य कति भेदाः ? के च ते?

*****************